श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री गोदोपमाष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री गोदोपमाष्टकम् ॥

सन्मानसाब्ज प्रवणां सारासारविवेकिनीम्।
सद्गतिं शुद्धरूपां त्वां गोदे ! हंसीं प्रचक्षते ॥ 1 ॥

तेजोमयस्वरूपत्वात् श्रीमत्सेवित वैभवात्।
चिन्तामणिसमागोदे ! देशिकैः त्वमिहोच्यसे ॥ 2 ॥

अनेकशाखोज्ज्वलित स्वरूपात्
अनन्तभोगिप्रिय वर्धकत्वात्।
सुरेशभूषासुमनः प्रदानात्
सुरद्रुमेणासि समाद्य गोदे ॥ 3 ॥

सद्गोविलासेन तमोहरत्वात्
समस्तसद्वन्दित मण्डलत्वात्।
पद्माननौज्ज्वल्यकर प्रभावात्
भासीह गोदे रवितुल्य शीला ॥ 4 ॥

कलानिधित्वात् कमलात्मकत्वात्
भवार्ति ताप क्षपणस्वशैत्यात्।
सदा महाविष्णुपदानुषङ्गात्
हिमांशुतुल्य त्वमिहासि गोदे ॥ 5 ॥

श्यामां द्विजाधिपसुतां श्रवणाभिरामां
मञ्जुस्वनां मदनमीश्वरजं भजन्तीम्।

गोदे गुरोस्त्रिजगतां गुणशालिनीं त्वां
    लीलाशुकीं कृतधियः समुदाहरन्ति ॥ 6 ॥

वृषप्रियां विश्वजनाखिलार्थ
    विश्राणनोत्कां विधिवासवेड्याम्।
श्रुतिप्रसन्नां सुरभिं विशङ्के
    स्वस्थां मखार्हां भवतीं तु गोदे ॥ 7 ॥

गोदे स्नातासि मातस्त्वमिह निगमशास्त्रोक्त मन्त्रक्रियाभ्यां
    एतेनैवातिपापा वयमपि सकला मुक्तपापा भवामः।
लोके दृष्टञ्च कर्मेदृशमिह सकलैः स्वप्रजारोग शान्त्यै
    माता पीत्वा कषायं तनयमथ निजस्तन्य दानेन पाति ॥ 8 ॥

॥ श्री गोदोपमाष्टकं समाप्तम् ॥